## ।। अथ एकविंशोऽध्याय: ।। Chapter-21

मान्धातोवाच :- निष्क्रान्तास्तेभ्यन्यग्रोधाद् भूतमात्रा तपोधन ।
यत्र यक्षा: स्थितिं चक्रुस्तन्मे कथय सुव्रत ।। १

वसिष्ठ उवाच :- पिंगाक्षं ते पुरोध्याय यक्षा वाक्यात् स्वयंभुव: ।।
स्थलं किंचित् समाश्रित्य स्थितिं चक्रुरतन्द्रिता: ।
उत्तरां दिशमाश्रित्य नदूरे गौतमाश्रमात् ।। २

कदाचिन्नदथ ते सर्वे राजन् सम्भूय गुह्यका: ।
बद्धाञ्जलिपुटा: शूरं पिंगाक्षमिदमब्रुवन् ।। ३

यक्षा ऊचु:- अत्रतीर्थान्यनेकानि समेतानि जगत्त्रयात् ।
तेषु देवा: समायान्ति ऋषयश्च तपोधना: ।। ४

न देवै: कलहो युक्त: पिंगाक्ष तदिहात्मन: ।
तथा कुर्मो यथा कश्चिन्ननावरोहायते स्थलात् ।। ५

पिंगाक्ष उवाच :- आराधयिष्ये देवेशं भवद्भि: सह गुह्यका: ।
तुष्टां तमर्थयिष्यामि वासमत्रैव निश्चलं ।। ६

-o-

२ ई सी तुष्टाः समर्पयिष्यन्ति वासमात्रैव निश्चलम्
१ ई मिदमब्रुवन्

वसिष्ठ उवाच :-तथेत्युक्त: स पिंगाक्षो यक्षराट् पिंगलोचन: ।
आस्थाय रहसि श्रीमान् तप: कर्तुं समुद्यत: ।। ७

उपवासपरो दान्त: कृतध्यानो जितेन्द्रिय: ।
जपन् षडक्षरं मन्त्रं प्राणायामपरोऽभवत् ।। ८

एवं तस्य तपोऽत्युग्रं कुर्वतो नृपसत्तम ।
गते बहुतिथे काले शंभुर्याति न दर्शनम् ।। ९

स तु लिंगं प्रतिष्ठाप्य विमलं स्थलमूर्द्धनि ।
पुष्पैर्गन्धैस्तथा धूपै:, नैवेद्यै: कृतेऽर्चनम् ।। १०

स्नात्वा त्रिकालं पिंगाक्षो जपन् सूक्तमतन्द्रित:
हृत्पद्मकर्णिकामध्ये बभार चिरमीश्वरम् ।। ११

एवं तपस्यतस्तस्य प्रसादसुमुखो हर: ।
कृत्वा यक्षांगनारूपं प्रत्यक्षोऽभूत् स्थलान्तिके ।। १२

-०-

२ ई सी स्थलान्तिके
१ ई खरक्षरंजपन्

कुर्वतीं नुपूरारावं नितम्बभरमन्थरा ।
विशाललोचना तन्वी चचार स्थलसीमनि ।। १३

नुपूरध्वनिमाकर्ण्य मत्तहंसरवोपमम्।
मुमोच सहसा ध्यानं पिंगाक्षो विस्मयान्वितः ।। १४

पदानि स्थलपद्मानि बिभ्राणां यक्षकामिनीम् ।
तां दृष्ट्वा चिन्तयामास पिंगाक्षो यातविस्मयः ।। १५

केयं कस्य कुतः प्राप्ता किं नाम्नी यक्षकन्यका ।
कर्तुमिच्छति कल्याणी किं वा मम समीपगा ।। १६

एवं चिन्तयतस्तस्य यक्षी प्राप्ता तदन्तिके ।
पुंस्कोकिलध्वनिकल्पं पिंगाक्षं वाक्यमब्रवीत् ।। १७

यक्ष्युवाच :- यक्षराज नमस्तेऽस्तु मुंचेदं दुष्करं तपः
अनन्यपूर्वां कामार्तां कुमारीं मां समुद्वह ।। १८

-o-

२ सी ई यक्षकन्यकाम्
बी १ कलं
३ ई समीयदंदुष्करंनतपः

ई - यक्षकामिनाम् तांदृष्ट्वाचिन्तमामास पिगांक्षो यातविस्मयः ।।
केयंकस्यकुतः प्राप्ताकिंनाम्नी

श्लोक श्लोक

(ए१) कुर्वन्ती

गान्धर्वेण विवाहेन कृत्वा पाणिग्रहं मम ।
तवार्थयि[1] तृष्यन्तीं स्थलशय्यागतामपि ।। १९

पिंगाक्ष उवाच :- लोलाक्षि मा विषीद त्वं रूपं तेऽप्रतुलं यतः ।
भर्ता ते भविता चान्यो नत्वहं तपसि स्थितः ।। २०

यक्षकन्योवाच :- तपः कुर्वन्ति मुनयः सिद्धा राजर्षयस्तथा[2] ।
स्वर्गांगनापरिष्वंगसुखलुब्धा महीतले ।। २१

पिंगाक्ष उवाच :- सत्यमुक्तं त्वया भद्रे स्त्रियो[3] दिव्यास्तपः फलं ।
प्राप्तस्य तपसः पारं फलं तन्न पुनर्मम ।। २२

यथेच्छं[4] याहि यस्मात्त्वं भर्तारं वरयापरं[5] ।
तपसो न निवर्तिष्ये विना धूर्जटिदर्शनम् ।। २३

वसिष्ठ उवाच :- इति यक्षीं निराकृत्य पिंगाक्षः शरणप्रदं ।
कृतवान्नियमं राजन् तस्थौ मीलितलोचनः ।। २४

-0-

३ सी देवाश्च:

५ ह सी वरम्

(ए१) तवार्थय

(ए२) यस्तथा

(ए४) यथेच्छं याहि

अथ तस्य परिज्ञाय हृदयं दृढमात्मनि ।
प्रत्यक्षोऽभून्महादेवः शूलपाणिर्वृषध्वजः ।।

उवाच वचनं देवः[1] स्मयमानः कलाधरः । २५

देवदेव उवाच :- वरं वरय पिंगाक्ष शंकरोऽस्मि विलोक्य ।
लोभाय तव यक्षेन्द्र यक्षीरूपं कृतं मया ।। २६

वसिष्ठ उवाच :- [2]तदाकर्ण्य विभोर्वाक्यं तथा त्रिपुरविद्विषः ।
उन्मील्य लोचने यक्षः शिरसा जगतीं ययौ ।। २७

बद्धाञ्जलिपुटो राजन् सम्प्रहृष्टतनूरुहः ।
स्तुत्वा प्रोवाच देवेशं हर्षपर्याकुलेक्षणः ।। २८

पिंगाक्ष उवाच :- प्रसन्नोऽसि यदीश त्वं देयो मे वाञ्छितो वरः
अयमस्तु स्थलोऽस्माकं लोके ख्यातस्तु पुण्यदः ।। २९

मयात्र स्थापिते लिंगे सदाशम्भो [3]स्थितिं कुरु ।। ३०

देवदेव उवाच :- एष यक्षस्थलो लोके पुण्यदः सर्वदा नृणां ।
पिंगाक्ष मे प्रसादेन भविष्यति न संशयः ।। ३१

-o-o-

१ बी राजन्
२ बी ई इत्याकर्ण्य
३ सी रूपस्थितिम्

त्वयात्र स्थापिते लिंगे सदा वत्स्याम्यहं पुन: ।
दास्यामि च परामृद्धिं ये(ऽ)र्च्चयिष्यन्ति भक्तित: ।। ३२

ये च दानं करिष्यन्ति महिष्या वै द्विजन्मने ।
परितुष्ट: प्रदास्यामि तेभ्यो यद् समीहितम्।। ३३

वसिष्ठ उवाच :- इत्युक्त्वा भगवान् शम्भुर्महाराज तिरोदधे ।
पिंगाक्षोप्यनुगै: सार्द्धं तस्थौ तत्र मुदान्वित: ।। ३४

तत: प्रभृति भूपाल जातो यक्षस्थलो भुवि ।
श्रीतीर्थे पुण्यदोनित्यं नराणां भक्तचेतसाम्।। ३५

इति श्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां ब्राह्म्य विभागे तृतीयपरिच्छेदे श्रीमालमाहात्म्ये यक्षस्थल महात्म्यं नाम एकविंशोऽध्याय: ।। २१ ।।

१ ए तृतिय